प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।

भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।७।।

**उत्सः** - प्रस्तुतश्लोकमिदं कविभासविरचितस्य स्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्काद् गृहीतम् ।

**प्रसङ्गः** - मगधराज्यस्य प्रान्तवर्तिनि आश्रमे मगधराजकन्यां पद्मावतीं प्रथमं दृष्ट्वा तत्रोपस्थितेन परिव्राजकवेशधारकेन यौगन्धरायणेन स्वगतं प्रस्तुतश्लोकवाक्यमिदं प्रयुक्तम् ।

**व्याख्या** – प्रद्वेषः अर्थात् अतिशयः द्वेषः इति बहुमानः अर्थात् अतिशयः आदरः इति एतौ द्वौ मानसिकव्यापारात् सङ्कल्पाद् वा एव जायते। तत्र सङ्कल्पः चित्तस्य वृत्तिविशेषः एकः। सर्वत्रैव जनस्य स्वभावः यस्य चित्ते यादृशो भावः उत्पद्यते यद्विषये, स तद्भावानुसारेणैव तं प्रद्वेष्टि बहु मन्यते वा इति। चित्तगतं भावम् अन्तरेण किमपि अन्य कारणं नास्ति प्रद्वेषस्य आदरस्य च। एषा पद्मावती उदयनस्य भार्या भविष्यति इति स्पृहावशात् यौगन्धरायणस्य अस्यां सन्मुखस्थितायां पद्मावत्यां महती स्वता अर्थात् आत्मीयता उपजायते। अर्थात् यौगन्धरायणेन यदा पद्मावती दृष्टा अपि च तस्याः परिचयं प्राप्तं तदा तस्यापि मनसि पद्मावतीविषये बहुमानः आगतः। यतो हि पद्मावती उदयनस्य पत्नी भवष्यति इति दैवज्ञप्रयुक्तं वाक्यं तस्य स्मरणे आगतमिति। अत्र अनुष्टुभ् वृत्तमस्ति।